3rd Elective
Archakatvam & Pourohityam (Optional)

Sastri / B.A 1st Year
Course/Paper.1

# ARCHAKATVAM & POUROHITYAM

तमसो मा ज्योतिर्गमय
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(केन्द्रीयविश्वविद्यालयः)


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# 2. नित्यनैमित्तिक काम्यकर्माणि

मानवाः मोक्षसम्पादनार्थं नित्यनैमित्तिक काम्यकर्माणि अनेकानि अनुष्ठानरूपेण स्मृतिकल्पसूत्रग्रन्थेषु निर्दिष्टं भवति। कानि नित्यकर्माणि भवन्ति। कानि कानि काम्यानीति विचारनीयाणि।

**नित्यकर्माणि-**

सूर्योदयादारभ्य सूर्यास्तमयपर्यन्तं यानि कर्मानि अस्माकं निर्दिष्टानि तानि नित्यानि भवन्ति। स्नानं, सन्ध्यावन्दनादिकं, भगवतः पूजा, पञ्च महायज्ञानि, आश्रमोक्त धर्मानि, होमविधिः, वेदाध्ययनं, गुरोः शुश्रूषा एतानि नित्यानि भवन्ति।प्रातः मध्याह्न सायंकालेषु अर्घ्यप्रदानं, गायत्री मन्त्रजपः, तर्पणादिः, सन्ध्याविधिः अवश्यं स्व स्व गृह- कल्पसूत्र प्रकारेण अनुष्ठे च भविष्यति। करणे नास्ति फलितं अकरणे प्रत्यवायः सम्भवति। नियमानुसारेण दोषाणाम् अपनोदनार्थं अवश्यम् अस्माभिः नित्यकर्माणि करणीयानि।स्वाद्याय स्वशाखाद्ययनं ब्रह्मयज्ञः भवति। प्रातः सायंकालयोः भगवतः अर्चनं देवयज्ञः भवति। पित्रूणाम् उद्दिश्य पूजनं, तर्पणं पितृयज्ञः भवति। भूतानां बलिदानं भूतयज्ञः भवति। अतिथीनां सत्कारं अतिथिपूजनं मनुष्ययज्ञः भवति। एते यज्ञाः गृहस्थैः नित्यं अनुष्ठेयाः। ब्रह्मचारिभिः गुरोः शुश्रूषा अन्नसम्पादनं प्रतिदिनं कार्यम्। वानप्रस्थैः सन्यासिभिश्च नित्यकर्माणि अवश्यं दोषाणां अपनोदनाय शरीरस्य मनसश्च निर्मलत्वसम्पादनार्थं अवश्यं अनुष्ठेयं भवति नित्यकर्म।।

**नैमित्तिकर्माणि-**

एकं निमित्तमाधारीकृत्य कर्म क्रियते चेत् तद्भवति नैमित्तिककर्म इति। पूर्णिमा, अमावास्या एकादशीत्यादि यानि पर्वदिनानि सन्ति तेषु दिनेषु तथा श्रीरामनवमी श्रीकृष्णाष्मी शिवरात्रिः विजयदशमी वैकुण्ठ एकादशी रथसप्तमीत्यादि पर्वदिनेषु भगवन्तमुद्दिश्य विशेषोपचारैः यत्पूजनं क्रियते तदुच्यते नैमित्तिकमिति। अस्मिन् कर्मणि बान्धवागमनं गृहालङ्करणादिकं द्रष्टुं शक्नुमः। पर्वदिनेषु भगवत्प्रीत्यर्थं यत्पूजादिकर्म क्रियते तदेव नैमित्तिकं कर्म भवतीति कल्पसूत्रावलोकनेन ज्ञायते।

**काम्यकर्माणि**

इह लोके परलोके च भोगादिसुखप्राप्त्यर्थं क्रियमाणं वेदोक्तकर्म यद्भवति तदेव काम्य कर्म इत्युच्यते। यथा-

| | | |
|---|---|---|
| पुत्रसन्तानार्थम् | - | पुत्रकामेष्टियागः |
| राज्याधिकारसिद्ध्यर्थं | - | अश्वमेधयागः। |
| स्वर्गप्राप्त्यर्थं | - | अग्निष्टोमः |
| पशु सम्पादनार्थं | - | ज्योतिष्टोमादिः |
| शत्रुनिवारणार्थं | - | सुदर्शनहोमः |
| नवग्रहदोषपरिहारार्थं | - | नवग्रहशान्तिहोमः इत्येवं रूपेण |

गृहे ये दोषाः सन्ति तद्दोषपरिहारार्थं- वास्तु होमः, इत्येवंरूपेण अनेके यज्ञयागादयः स्मृतिधर्मशास्त्रग्रन्थेषु प्रतिपादिताः सन्ति। यजमानस्य मनोभीष्टफलसिद्ध्यर्थं विहितकाम्यकर्म कर्तव्यम्। यथा- आरोग्यसिद्ध्यर्थं, ज्योष्ठा नक्षत्रादीनां जन्मदोषनिवारणार्थं, -राजद्वारा अनुकूलसिद्ध्यर्थं, विद्या उद्योग विवाहसिद्ध्यर्थं, निर्वचितेषु विजयसम्पादनार्थं, भगवन्तमुद्दिश्य वेदोक्तप्रकारेण यत्कर्म क्रियते तदेव काम्यमित्युच्यते।

**इति नैत्यनैमित्तिककाम्यकर्माणि।**

## ३.स्नपनविधिः-

भगवतः विग्रहशुद्ध्यर्थं स्नपनविधिः आगमग्रन्थेषु प्रोक्तम्। स्नपनमेव अभिषेकः, तिरुमञ्जनम् इत्यादिरूपेण व्यवहरन्ति। स्नपनविग्रहस्य स्वरूपं आलये प्रतिष्ठितं भवति। आलये स्नपनकार्यं प्रतिदिनं अर्चकाः कुर्वन्ति। मूलविग्रहस्य स्नपनं अर्चकाः विशेषदिनेषु करिष्यन्ति।

**देवालयविग्रहभेदाः-**

एकस्मिन् आलये बहुविधानि विग्रहानि विराजन्ति। तेषु कानिचन बेरानि परिवार विग्रहानि, कानिचन विमानविग्रहानि, कानिचन बलिविग्रहानि, कानिचन देवी विग्रहानि, कानिचन द्वारपालकविग्रहानि स्युः। तेषु गर्भालये प्रतिष्ठानि बेरान्येव प्रधानानि भवन्ति। अतः आदौ तानि परिशीलयामः- विग्रहस्य प्रतिष्ठाक्रमः चल अचल इति द्विधा भवति। चलविग्रहप्रतिष्ठा अचलविग्रहप्रतिष्ठा इति द्वयोः प्रतिष्ठयोः मूलविग्रहानां प्रतिष्ठा अचला इति, अन्येषु विग्रहानां प्रतिष्ठा चला इति आगमग्रन्थाध्ययनेन ज्ञायते। प्रत्येकस्मिन्नपि आलये धृवादिविग्रहानि पञ्च अवश्यं स्थापनीयानि। तेषु धृवविग्रहं प्रधानं भवति। अन्यानि कौतुक, स्नपन, उत्सव, बलि चत्वारि विग्रहानि अनुसन्धानि भवन्ति।

**विग्रहस्य प्राशस्त्यम् -**

आचार्यास्तु शिल्पिना रुपं कल्पयन्ते। तत्र अर्चकाः हृद्गत परमेश्वरं वेदमन्त्रैस्सह आरोपयन्ति। तामर्चयेत्, तां नमेत्, तां विचिन्तयेत्, विग्रहस्य अर्चनादिपूजा, नमस्कारं च अवश्यं करणीयम्, नो चेत् मनोचाञ्चल्यं भवति तस्य निवारणाय मनसः दृष्टेश्च अचञ्चलत्वस्थापनाय अर्चना कर्तव्या।

**विग्रहानाम् आवश्यकता-**

एकस्मिन् यज्ञकर्मणि पञ्चाग्नयः यथा कल्पिताः, यथा एकस्मिन् शरीरे पञ्चावयवाः भवन्ति, तथैव आलये पञ्चबेरानि कल्पनीयानि।

**ध्रुवबेरः-**

विग्रहमिदं सर्वेष्वपि प्रधानं भवति। अस्य विग्रहस्य मूलविग्रहमिति प्रधानविग्रहमिति च कथ्यते आगमिकैः । विग्रहमिदं ग्रामरक्षनार्थ, अलङ्कारार्थं, दर्शनार्थम् स्थाप्यते।।

**कौतुकबेरः-**

अर्चनार्थं तु कौतुकम् इदं चलविग्रहम् इत्युच्यते। केवलं अर्चनार्थं नित्यधूपदीपनैवेद्यनीराजनग्रहणार्थम् इदम् उद्दिष्टम्।।

**स्नपनबेरः-**

स्पननार्थं स्नपनबेरं सर्वेष्वपि आलयेषु प्रतिष्ठितं भवति। नित्यनैमित्तिककाम्येष्वपि सर्वेषु सन्दर्भेषु अस्य बेरस्य स्नपनं कुर्वन्ति। विशेषदिनेषु ध्रुवबेरस्य स्नपनं चलति। ब्रह्मोत्सवदिनेषु उत्सवबेरस्य स्नपनं कुर्वन्ति। तिरुमलक्षेत्रे विराजमानस्य श्रीवेङ्कटेश्वरस्य सन्निधौ बुधवासरे प्रचाल्यमाने सहस्रकलशाभिषेक सन्दर्भे उत्सवबेरस्य कौतुकबेरस्यापि स्नपनं वैभवेन प्रचलति। प्रति शुक्रवासरे ध्रुवबेरस्य विशेष सुगन्धद्रव्यैः स्नपनं चलति ।।

**उत्सवबेरः-**

प्रतिसंवत्सरं वैभवेन क्रियमानेषु उत्सवसन्दर्भेषु ब्रह्मोत्सवः विशिष्टः विनूत्नश्च भवति। वीथिषु बहवः भक्तजनाः हरिनामसङ्कीर्तनेन सङ्गीतवाद्यनृत्यादिना श्रीवेङ्कटेश्वरं स्मरन्तः प्राकारप्रदक्षिणं कुर्वन्ति। तान् सर्वानपि उद्धर्तुं लोकनाथः वेङ्कटपतिः रथमारुह्य तिष्ठति। रथस्थं केशवं दृष्ट्वा पुनर्जन्म न विद्यते इति पुराणवाक्यानुसारं सहस्राधिकजनाः गोविन्दं स्मरन्ति , दृष्ट्वा पुनन्ति च। तदर्थं आरब्धः पुरा ब्रह्मणा अयम् उत्सवः। उत्सवविग्रहान् वाहनेषु सम्यक् संस्थाप्य अलंकृत्वा विविधैः उपचारैः चत्र चामर रथ.गजयुतैः राजलाञ्छनैश्च भगवतः विग्रहानां उत्सवः क्रियते चेत् सः ब्रह्मोत्सवः भवति। अस्मिन् ब्रह्मोत्सवे उत्सवविग्रहानां आवश्यकता प्रतिपादिता। अतः सर्वेष्वपि आलयेषु उत्सवविग्रहानां प्रतिष्ठा दृश्यते।।

**बलिविग्रहम् -**

एकस्मिन् आलये बहवः देवताः विराजन्ते, ते तावत् भक्तानां इहपरसुखान् सर्वानभीष्टान् चतुर्विधफलपुरुषार्थान् , सालोक्य सामीत्य सारूप्य सायुज्यन्ते। मोक्ष धनधान्यपशुपुत्रलाभादीनि च ददन्ति। विद्यमानां एतेषां देवतानां प्रतिदिनं बलिवर्धकम् अन्नं दातव्यम्। तस्य कर्मणः आलय बलिः इत्यपि तासां च नामानि वर्तन्ते। बलिसमये आलये विराजमानस्य बलिविग्रहस्यैव साक्षी मात्रेण बलिः दातव्यम्। तदर्थं सर्वेष्वपि आलयेषु बलिविग्रहम् आवश्यकं भवति। बलिकाक्षिणः देवतास्तावत् द्वारदेवः द्वारपालकाः विमान देवाः, विमानपालकाः, अनपालनः आचरणदेवाः मण्डपदेवाः, गोपुरदेवाः, द्रव्यदेवाः परिषददेवाः इत्यादयः बहवः देवाः पञ्चशताधिकाः विराजन्तीति आगमग्रन्थाः उपदिशन्ति। एतेषां बलिप्रधानसमये बलिविग्रहस्य आवश्यकता उपदिष्टा।।

**तीर्थविग्रहम्-**

पञ्चरात्र आगमग्रन्थेषु ध्रुव-कौतुक-बलिबेरैः सह तीर्थविग्रहमपि अन्यतमं विग्रहम्। ब्रह्मोत्सवस्य अन्त्यदिने अवभृथ स्नानार्थं उद्धिष्टं भवति। तस्मिन् समये एव अस्य विग्रहस्य आवश्यकता प्रतिपादिता। अन्यस्मिन् समये तस्य उपयोगः न कल्पितः एवं प्रकारेण परिवारैर्युक्तम् उत्तमोत्तमं सर्वसम्पत्करं चक्षुर्मनसोः प्रीतिकरं देवप्रियकरं च भवेत्। तस्मात् सर्वप्रयत्नेन एतैः प्रकारैः परिवारैश्च युक्तम् आलयार्चनमाचरेत्।।

ध्रुवन्तु ग्रमरक्षार्थं अर्चनार्थं तु कौतुकम्।
स्नपनार्थं तु स्नपनं प्रोक्तं उत्सवार्थं अथ उत्सवम्।
बाल्यर्थं बलिबेरं च पञ्चबेरान् प्रकल्पयेत्।
पुरस्तात् गुरुदं तस्य देवाभिमुखमर्चचेत्।।

एकस्मिन् आलये बहूनि विग्रहानि शोभनार्थं मङ्गलार्थं सर्वाऽशुभनिवारणार्थं मानवस्य मनोविकासार्थम् अवश्यं भवेयुः। एतेषां अर्चनं सर्व यज्ञफलप्राप्ति साधनं च स्यात् अयं ध्रुवादिबेरपरिचयः।

अभिषेकप्रियो शिवः इति वाक्यमनुसृत्य परमशिवस्य स्नपनं पञ्चवारं वा सप्तवारं वा शिवमन्दिरेषु कुर्वन्ति। सुगन्ध-सुमनोहर-द्रव्यविशेषैः क्रियमानस्य स्नपनस्य किञ्चित् वैशिष्ट्यं दरीदृश्यते। दुर्भिक्ष, अनावृष्टि, उपद्रवानां निवृत्त्यर्थं सर्वाभीष्टसिद्ध्यर्थम् इष्टकाम्यार्थफलसिद्ध्यर्थं विशेषफलसम्पादनार्थं भगवतः स्नपनकार्यक्रमं विहितम् आगमग्रन्थेषु। स्नपनद्रव्याणि- पञ्चगव्यम्, घृतं मधु दधि क्षीरम् गन्धोदकम् अक्षतोदकम् फलोदकम् कृशोदकम् रत्नोदकम् जप्योदकम् सर्वौषध उदकानि इति द्वादशप्रकाराः सन्ति। घृत-दधि-क्षीर-गोमय-गोमूत्रैः सहितं पञ्चगव्यं भवति। पञ्चदश अनातीतं घृतं स्नपनार्थं ग्राह्यं भवति। पुष्पदवनकं मधु भवति। शुद्धं दधि ग्राह्यं भवति। सद्यो दुग्धं क्षीरं श्रेष्ठं भवति। जलपुष्पचन्दनादियुक्तं गन्धोदकं भवति। अक्षतैः सहितं अक्षतोदकं, कदलीचूतपनसनारिकेलफलैः युक्तं फलोदकं, कुशैः सहितं कुशोदकम्, नवरत्नैः समायुक्तं रत्नोतदकम्, मन्त्रैः अभिमन्त्रितं जप्योदकं भवति। ओषदीभिः युक्तं जलं भवति औषधोदकम्, एते सर्वेऽपि भगवतः स्नानार्थं ग्राह्यानि इति स्नपनद्रव्याणि इत्युच्यते।

**उत्तमादिभेदाः-**

द्वादशप्रधानकलशैः सह द्वादश उपस्नानकलशाः संयुक्ताः चेत् तदुच्यते अधमाधमस्नानमिति।।एकैकस्य प्रधानकलशस्य त्रयः त्रयः उपस्नानकलशाः स्थापिताः चेत् अधममध्यमा भवति। प्रधानकलशैः उपस्नानकलशाश्च गुणीकृत्वा अष्टोत्तरशतकलशाः यत्र भवन्ति तदुच्यते अधमोत्तमम् इति। अष्टोत्तरशतकलशान् दशगुणं चेत् असीत्युत्तरसहस्रकलशाः भवन्ति, स्नपनमेतद् उत्तमोत्तमं भवति।

**स्नपनप्रयोगः-**

अर्चकः प्रसन्नो भूत्वा तिथिवारादीन् संकल्प्य सर्वलोकक्षेमार्थम् अरिष्टनिवारणार्थं स्नपनं करिष्यामि इति संकल्प्य, विघ्नेश्वरं संपूज्य पुण्याहवाचनं करिष्ये इति संकल्प्य, कृत्वा द्रव्यान् संपूज्य अर्घ्यपाद्याचमनादिना देवं सम्पूज्य, एकैक प्रधानकलशेन एकैक उपस्नानकलशेन च वेदोक्तमन्त्रैः स्नपनबेरं पवित्रीकृत्य निवेदनानि कृत्वा पुष्पाञ्जलीं समर्प्य स्नपनं समापयन्ति।

**स्नपनफलम्-**

अनेन आगमोक्तस्नपनेन सर्वैः इह परसुखानि भोगभाग्यादीनि प्राप्तुं शक्यते। व्यादयः शान्तिं यान्ति। भगवतः विशेषानुग्रहेण लोकाः समस्ताः सुखिनो भवन्ति।

**स्नपनद्रव्याः**

| | |
|---|---|
| पञ्चगव्यकलशे-- | शर्वः |
| घृतकलशे-- | साववेदः |
| मधुकलशे- | ऋग्वेदः |
| दधिकलशे- | यजुर्वेदः |
| क्षीरकलशे- | अथर्ववेदः |
| गन्धोदककलशे- | ऋतवः |
| अक्षतोदककलशे- | कश्यपः |
| फलोदककलशे- | सोमः |
| कुशोदककलशे- | तक्षकः |
| रत्नोदककलशे- | विष्णुः |
| जप्योदककलशे- | पवित्रः |
| ओषधी उदककलशे- | आदित्यः |
| पुष्पोदक कलशे- | धाता |
| वस्त्रेषु कलशे- | ईशानः |
| आभरणे कलशे- | षण्मुखः |
| वस्त्रे कलशे- | सोमः |
| उपवीते कलशे- | विष्णुः |

**स्नपनद्रव्याः- फलिताः**

| | |
|---|---|
| दधि- | वंशवृद्धिः |
| पञ्चगव्यं- | आत्मशुद्धिः पापनिवृत्तिः |
| चन्दनादि तैलः- | सुखम् |
| कदलीफलम्- | धान्यसमृद्धिः |
| शुद्धान्नम्- | देहकान्तिः- विवाहः. सौभाग्यः |

| | |
|---|---|
| चूतफलम् (आम्रफलम्) - | सकलपश्यः |
| चूतफलम् - | लोकपश्यः |
| चूतफलम् (द्राक्षफलम्)- | निर्णयः |
| चूतफलम्- | यमभयम् |
| कुम्भजलम्- | अश्वमेधयागः |
| हरिद्रा- | राजपश्यः |
| चूतफलम्- | शत्रुभयम् |
| आम्रफलम्- | भूलाभम् |
| तैलम्- | भक्तिः सुखम् |
| शर्करा- | मित्रवृद्धिः शत्रजयम् |
| पञ्चामृतम्- | दीर्घायुः |
| शुद्धोदकम्- | मनःशान्तिः |
| घृतम्- | मोक्षः |
| क्षीरम्- | यशोवृद्धिः दारेघैयिः |
| नारिकेलफलम्- | राज्यपालन |
| सुगन्धद्रव्यानि- | मनोबलं, आयुर्दायम् |
| कस्तूरि- | कार्यजयम् |
| गोरोचनम्- | वाक्शुद्धिः |
| कनकाभिषेकम्- | वैराग्यम् |
| भस्मः- | ज्ञानम्, रोगनिवारणम् |
| कर्पूरः- | ऋणविमुक्तिः |
| मधु- | गात्रवृद्धिः सङ्गीतज्ञानम्, विद्या |
| श्रीगन्धम्- | स्वर्गभोगम् |
| शङ्खुजलम्- | रोगनाशनम् |
| सहस्रधार- | धनलाभम् |
| वस्त्रानि--- | राजयोगः |
| पुष्पाणि- | आनन्दः |
| तैलम्- | अरिष्टनिवारणम् |
| रजितम्- | ऐश्वर्यम् |
| नवरत्नानि-- | ग्रहशान्तिः |
| पानकम्-- | सङ्कल्पसिद्धिः |

## ३. अर्चक नियमाः

अर्चक- ब्राह्मीमुहूर्ते उत्थाय शौचादिकं कृत्वा विधिवत् संकल्पपूर्वकं स्नात्वा सन्ध्यावन्दनाग्निकार्यप्रतिमार्चनादिकं नित्यकर्म समाप्य वस्त्रादिना अलङ्कृतस्सन् देवालयं प्रति गच्छेत्।। आलयस्य पुरतः पाद प्रक्षालनं कृत्वा द्विशचम्य तालत्रयं कुर्यात्।। तदुक्तं यथा-

दक्षिणे वामं संताड्य वाम दृस्तेन दक्षिणम्।
वामं दक्षिणदृस्तेन कुर्यात् तालत्रयं बुधः।।
एकतालेन मरणं द्विताले व्यधिपीडनम्।
त्रिताले सुखमाप्नोति तस्मात्तालत्रयं कुरु।।

ऊर्ध्वपुंड्रादिकं धृत्वा तुलसीमालादिकं कण्ठे धारणं कृत्वा कवाटोद्घाटनात्पूर्वं तत्समीपं गत्वा प्रार्थनां कृत्वा द्वारपालकान् एवं नमेत्।।

पूर्वद्वारे द्वारश्रियै नमः जयाय नमः विजयाय नमः।
दक्षिणद्वारे द्वारश्रियै नमः बलाय नमः प्रबलाय नमः।
पश्चिमद्वारे द्वारश्रियै नमः नन्दाय नमः शुनन्दाय नमः।
उत्तरद्वारे द्वारश्रियै नमः कुमुदाय नमः कुमुदाक्षाय नमः।

एवं द्वारपालकानां अनुज्ञां स्वीकृत्य "वायवायाहि" इति मन्त्रेण देवालयस्य कवाटोद्घाटनं कुर्यात।। तालत्रयं कृत्वा दक्षिण। पादपुरस्सरं देहलीं अस्पृशन् देवालयं प्रविशेत्।। "अग्निनाग्निसमिध्यते" इति मन्त्रपुरस्सरं दीपं प्रज्वालयेत्।। (अथवा)"ओं रं जगज्जोतिरूपाय नमः" इति मन्त्रेण दीपं ज्वालयेत्।।

कौसल्या सुप्रजा रामपूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ।।

इत्यादि श्लोकैः "उत्तिष्ठ ब्रह्मणस्पते" इति मन्त्रेण च देवमुत्थापयेत् ।। अपसर्पंतु ये भूताः इति मन्त्रं उच्चश्न् भूतोच्छाटनं कृत्वा नारायण मुद्रयादिग्बन्धनं कुर्यात्।। मानुषो गन्ध आयाति देव तत् क्षम्यतां प्रभो इति सम्प्राथ्र्य एभ्यो माता, एवा पित्रे विश्वेदेवाय इति द्वाभ्यां मन्त्राभ्यां मानुषगन्धं निरसयेत् ।। ततः परं स्वस्य देवस्य च अन्तरे विद्यमानं जवनिकां अपसार्य निर्माल्यविसर्जनं अम्भृणीसूक्तश्त्रीसूक्ताभ्यां वा कुर्यात् ।। निर्माल्यं नाम पूर्वदिने पूजाकाले भगवतः यत् पुष्पादिकं समर्पितं तदेव भवति ।। तदुक्तं यथा-

न भारं मेरु शिखरं न भारं सप्तसागशन्।
शत्रौ पूजित निर्माल्यं प्रभाते भारमद्भुतम्।।
अहो रात्रं तु निर्माल्यं प्रातकाले विसर्जयेत्।

भगवतः ह्यस्तनदिने समर्पित पुष्पतुलसीचन्दनादीनौ निर्माल्यं इति कथ्यते। तेषां प्रभाते विसर्जयेत्। निर्माल्यविसर्जनानन्तरं शुद्धिः करणीया वर्तते ।। सा शुद्धिः पञ्चधा प्रोक्ता - भूतशुद्धि, पात्रशुद्धि, अत्मशुद्धि, बिम्बशुद्धि, इति।। ततः देवपूजार्थं एकस्मिन् कलशे त्रिवारं वस्त्रशोधितं शुद्धजलं अनयेत्।। तेन जलेन अर्घ्यपाद्यायमनस्नानशुद्धोदकपात्रेषु जलं पूरयित्वा तेषु लक्ष्म्यादिक्रमेण देवतानावाह्य गन्धपुष्पतुलस्यादिना समर्च्य विष्णुगायत्र्या अभिमन्त्रयेत्।। ततः पर प्रतिमायां विशेषसान्निध्यता सिद्ध्यर्थं आगमोक्तप्रकारेण अङ्गन्यासकरन्यासतत्वन्यास मातृकान्यासादिकं देवे आत्मनि च मालाकारेण विन्यसेत् ।। आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य श्त्रीविष्णुप्रेरणया, श्रीविष्णुप्रीत्यर्थं भगवतो वीर्यैण भगवतो बलेन भगवतः तेजसा भगवतो श्रीलक्ष्मीनारायणस्य भगवतः कर्मणा भगवता श्रीवासुदेवेन प्रेरितोऽहं लोकत्रेमार्थं, देश क्षेमार्थं यथाज्ञानेन यथामिलितोपचारद्रव्यैः मम योग्यतानुसारेण आगमोक्तरीत्या ध्यानावाहनादिषोडशोपचार पूजां करिष्ये इति सङ्कल्प्य जलंपात्रे त्यजेत्।। अनंतरं कलशस्य मुखे विष्णुरित्यादि श्लोकैः इमं मे गङ्गे, प्रसुव आपो महिमानसूक्तैश्च अब्लिंगैमन्त्रैः कलशपूजां समाप्य देवस्य ध्यानावाहनादिक्रमेण आगमोक्तरीत्या षोडशोपचारपूजां यथाशास्त्रं आगम विशारदेन वेदाध्ययनशीलेन तत्वज्ञेन अर्चकेन कुर्यात् ।।

अर्चक शब्दः अर्च - पूजायां इति धातुतः निष्पन्नः वर्तते। अचयतीति पूजयतीति अर्तकः।। पूजकः इति च अर्चकस्य अपरं नाम।।

अन्यान्यशास्त्रेषु विनोदमात्रं
न तेषु किंचित भुवि दृष्टमस्ति।
वैद्यशास्त्रं ज्योविषः तन्त्रवादाः
पदे पदे प्रत्यक्षमाह्वयन्ति।।

इत्युक्तप्रकारेण वैद्यशास्त्रं, ज्योतिषशास्त्रं, तन्त्रशास्त्राण्येव प्रत्यक्षफलदायकानि शास्त्राणि भवन्ति। एतेषु शास्त्रेष्वपि विशेषाकारेण जन्मांतरेषु च अधिकं फलं यत् शास्त्रं दास्यति तदेव तन्त्रशास्त्रमित्यभिधीयते ।।

तनोतति विपुलान अर्थान तत्त्वमन्त्रसमन्वितान।
त्राणं च कुरुते यस्मात् तन्त्रमित्यभिधीयते।।

एवं तन्त्रशब्दः बहुव्यापकार्थकः भवति। यथा व्यवहारे जीवनतन्त्र, राज्यतन्त्र, कार्यतन्त्रेत्यादिषु तन्त्रशब्दः बहुव्यापकार्थकः वर्तते।। परं अत्र भगवतः सकाशात् त्राणं विशेषतः रक्षणं करोति इति तन्त्रशब्दार्थः।। एतादृशतन्त्रशास्त्रेण आगमशास्त्रेण प्रतिमापूजा करणीया इति वेदविहिता वर्तते।। अपौरुषेये वेदे यानि वाक्यानि पूजा सम्बन्धीनि उक्तानि वर्तन्ते तान्येव आगम शास्त्रेषु श्लोकरूपेण समग्रं सविस्तं कथितम्।। अतः आगमानुसारेण पूजाकरणेन प्रतिमायां देवस्य विशेषसान्निध्यता

भवितुमर्हति।। अत एवोक्तं अर्चकस्य तपो बलात् शिलायां देवत्वं भजते इति ।। आगमज्ञोहि अर्चकः कथं भवितव्यमिति चेत् परमेश्वरः श्रीपश्न संहितायां अर्चकनियमाः उक्तस्सन्ति ।। तद्यथा-

आत्मानं वस्त्रयुग्मेन कुण्डलादिविभूषणैः।
श्वेतमृत्स्नोर्ध्वपुड्रैश्च चन्द्रनाद्यैस्सुगन्धिभिः।।
हेमोपवीतैस्स्रग्भिश्च भूषयेदर्चकोत्तमः।
मुखनाससमोपेतैः ताम्बूलैः शोधयेन्मुखम्।।

एवं उक्तप्रकारेण अर्चकः एकं वस्त्रं धृत्वा उपरि एकं परिधाय, मकरकुण्डलादि अभरणानि भूषयित्वा, ऊर्ध्वपुंड्रसुगन्धादीन् लेपयित्वा एलालवङ्गादिमिश्रित ताम्बूलं चर्वयित्वा अभुक्तो भुक्तो वा अपि पूजकः प्रसन्नचित्रः सन् शान्तः दान्तः भक्तियुक्तस्सन् पवित्रपाणिः सन्नपि च देवं प्रपूजयेत्।।

## गृहार्च, देवालयार्चः

**गृहार्चः :-**

चित्रबिम्बाः गृहे स्थापयति चेत्- २cm उपरि अधिकं भवति चेदपि दोषः नास्ति।। गृहे मृत्तिक, दारु, शिला विग्रहानि न अर्चनीयः गृहे पूजामंदिरम् वायव्यदिशां वा अथवा नैऋति दिशां वा निर्माणः करणीयः ।। ४cm उन्नतरूपेण मूलविग्रहः स्थापनीय- ।। १२ अंगुल प्रमाणः विग्रहः मध्यमफलं दास्यति ।। ८ अंगुलप्रमाण विग्रहः अपि भवेयुः ।। मानांगुल प्रमाणेन गृहे विग्रहः स्थापनीयः। हस्तमात्र प्रमाणस्य अधिकं न भवेत्, १२ अंगुलप्रमाणाः न्यूनं न भवेत्।।

१) ब्राह्मणाः पूजां कुर्वन्ति गृहार्चः = 24 मानांगुलाः।।
२) क्षत्रियः पूजां कुर्वन्ति गृहार्चः = 21 मानांगुलाः।।
३) वैश्यः पूजां कुर्वन्ति गृहार्चः = 19 मानांगुलाः।।
४) शूद्रः पूजां कुर्वन्ति गृहार्चः = 17 मानांगुलाः ।।

**अर्थचित्र, चित्राऽभास प्रतिमाविषयः :-**

गृहे रेखचित्राः चित्ररहितः क्वचित् प्रमाणानि दैवरूपेण पूजनं करोति चेत् मानवानां भुक्तिः लोपः न भवति ।।

**१.लोहविग्रह प्रमाणः :-**

१) ब्राह्मणः पूजां कर्तुं = 12 मानांगुलाः।।

२) क्षत्रियः पूजां कर्तुं = 9 मानांगुलाः।।
३) वैश्यः पूजां कर्तुं = 7 मानांगुलाः।।
४) शूद्रः पूजां कर्तुं = 5 मानांगुलाः ।।

गृहे शतृसंहाररूपेण, देवालये, गृहे चतुर्मख ब्रह्मा; वीरलक्ष्मी देवी; विश्वरूपमूर्ति; भार्गवपरशुरामः इत्यादि देवतानां अर्चना न करणीयः।। गृहे वायव्यदिशां विग्रहस्य अर्चनः करणीयः।। बृहत् भवनेषु यजमानि इष्टानुसारेण कुत्राऽपि पूजां कर्तुं शक्यते ।। शिला, दारु उपयुज्य कृतः विग्रहः गृहे न अर्चनीयः।। आगमशास्त्र, वेदशास्त्र ब्राह्मणाः गृहे देवस्य अर्चनाकाले बलिः दास्यन्ति।। गृहे होमः न करणीयः।। गृहे अर्चनां करोति विग्रहस्य उन्नतिः ६,८,१२ अंगुलाः भवेयुः।।

**२.विष्णुद्वारपालकाः :-**

१) गर्भगृहस्य प्राक्द्वारे दक्षिणभागे (१) चन्द्रः उत्तरभागे (२) प्रचण्डः
२) अन्तर्मण्डल प्रकारे प्राक् पश्चिम दिशायां (३) जयः (४) विजयः शंख, चक्रधारिणः भवन्ति ।।

**३.अन्तर्हारप्राकारे :-**

(a) प्राक्द्वारपालकाः -(५) धातृ (६) विधातृ पदन्म, गदा धारिणः भवन्ति।।
(b) दक्षिणद्वारपालकाः -(७) भद्र (८) सुभद्र खड्ग, शारङ्ग धारिणः भवन्ति।।
(c) पश्चिम द्वारपालकाः - (९) कृतांत (१०) असुर द्वंसकः वज्र, मुसल धारिणः भवन्ति।।
(d) उत्तरद्वारपालकाः - (११) कुबेराक्ष (१२) कुबेरकः पाश, अंकुश धारिणः भवन्ति ।।

**४. मर्यादावरणे :-**

(a) प्राक्द्वारे - (१३) दुर्जय- (१४) प्रबलः
(b) दक्षिमद्वारे - (१५) विश्वभावनः (१६) पुष्पकः
(c) पश्चिमद्वारे - (१७) सम्भवः (१८) प्रभवः
(d) उत्तरद्वारे - (१९) सुशोभन- (२०) सुभद्रकः

**५. पञ्चमावरणे :-**

(a) प्राक्द्वारे - (२१) कुमुदः (२२) कुमुदाक्षः
(b) दक्षिणद्वारे - (२३) पुण्डरीकः (२४) वामनः

(c) पश्चिमद्वारे - (२५) शंकुकर्णः (२६) सर्वनेत्रः
(d) उत्तरद्वारे- (२७) सुमुखः (२८) सुप्ततिष्ठः

**६. पादगोपुरे :-**

प्राक् भागे - (२९) सूर्यः ; पश्चिमभागे (३०) चन्द्रः

**७.बलिपीठे :-**

(३१) आमोदः (३२) प्रमोदः।। आहत्य ३२ द्वारपालकाः भवन्ति।।

**वैष्णवस्य जाता शौच, मृता शौचः नास्ति :-**

विष्णुतत्वं त्रिकरणि शुद्ध्या मनसि संस्थाप्य अनुष्ठान ब्राह्मणस्य सूतक, मृताशौचः न भवति।। "ओं नमो भगवते वासुदेवाय" इति द्वादशाक्षर मन्त्रः पञ्चशतवारं जपं करणीयः।। अन्येषां स्पर्शनं, अन्येषां गृहे भोजनखादनं अन्येषां कृते किमपि दातव्यं, दशमदिने क्षौरकर्म, तिलोदकः इत्यादीनि त्याज्यानि।।

**देवमुखः - सोमसूत्रदिशः :-**

स्वामिमुखः प्राक्पश्चिमदिशायां भवति चेत् जल प्रणाली उत्तरदिशौ भवेत् ।। स्वामिमुखः उत्तर, दक्षिण दिशायां भवति चेत् जलप्रणाली प्राक्दिशौ भवेत्।। सोमसूत्रः प्राक् दिग्भागे भवति चेत् धन, धान्य, सम्पदः भवति।। दक्षिणदिग्भागे भवति चेत् आयुर्वुद्धिः।। पश्चिम दिग्भागे भवति चेत् कीर्तिः एश्वर्यः।। उत्तरदिग्भागे यजमानस्य, ग्रामस्य, सकललोकस्य भोग, भाग्यः भवति।।

**लक्ष्मी अर्चन मण्डपः :-**

आश्वयुजमासे श्रीवरलक्ष्मी शरन्नवरात्रि उत्सवेषु, फाल्गुणमासे पूर्णिमादिने श्रीकामव्रतेषु मण्डपस्य चित्र, विचित्र वर्णेन सुगन्धपुष्पैः अलंकारं कृत्वा मण्डपनिर्माणः करणीयः।।

**मण्डपस्य :-**

(a) आग्नेयकोणे - गुग्गुः इति नाम्ना दिव्यगजेन्द्रः।।
(b) नैऋतिकोणे - कुरण्डः इति नाम्ना दिव्यगजेन्द्रः ।।
(c) वायव्यकोणे - दमकः इति नाम्ना दिव्यगजेन्द्रः ।।

(d) ईशान्यादिकोणे - शलः इति नाम्ना दिव्यगजेन्द्रः ।।

निर्माणं कुत्वा सकलजगन्मातः महिषासुरमर्थिनि श्रीमहालक्ष्मी सेवा करणीया ।। सिंह विष्टर पार्श्वेषु १) महापद्मनिधि २) पद्मनिधि ३)शंखनिधि ४)मकरनिधि ५)कच्चपनिधि ६)मुकुन्दनिधि ७)कुन्दनिधि ८)नीलनिधि ९)परनिधि इति नवनिधयः सन्ति।। एतानि नवनिधय- सर्वदा मातायाः सेवाकुर्वन् इति रूपेण निर्माणः करणीयः ।।

**होमकाले उच्चारण मन्त्रशब्दाः - फलिताः :-**

१) देवता प्रीत्यर्थं सर्वदा "स्वाहा" इति।।
२) वांच्छार्थ सिद्ध्यर्थं "वैषट्" इति।
३) शान्त्पर्थं "तम्" इति ।।
४) सर्वव्यापनार्थं "वषट्" इति।।
५) पितृक्रियेषु "स्वथा" इति ।।
६) मारणकर्मेषु "फट्" इति ।।
७) शतृपराजयार्थं "हुं" इति।।
८) वशीकरणार्थं "ह्रीं" इति।।
९) मोक्षप्राप्त्यर्थं "नमो" इति उच्चारणः करणीयः।।

**कुण्डलाः - दिशयः - आकृतयः :-**

(a) चतुरस्त्र कोण कुण्डः - प्राक्दिशौ।।
(b) धनुशकार कुण्डः - दक्षिणदिशौ ।।
(c) पद्माकार कुण्डः - पश्चिमदिशौ ।।
(d) त्रिकोणाकार कुण्डः - उत्तरदिशौ।।
(e) चतुष्कोण कुण्डः - आग्नेय कोणे ।।

**अष्ट कुण्डकल्पनम् :-**

(a) प्राक् दिशौ - चतुरश्र कुण्डः ।।
(b) आग्नेय दिशौ - योनि कुण्डः ।।
(c) दक्षिण दिशौ - घन कुण्डः ।।
(d) नैऋति दिशौ - षट्कोण कुण्डः ।।
(e) पश्चिम दिशौ - वृत्त कुण्डः ।।
(f) वायव्य दिशौ - पञ्चाश्र कुण्डः ।।

(g) उत्तर दिशौ - त्रिकोण कुण्डः ।।

(h) ईशान्य दिशौ - अष्टकोण कुण्डः।।

**देवालयार्चः :-**

आलयाः विमानगोपुरः समचतुरश्रः भवति चेत् मानवानां शांति, पुष्टिः भवति।। वृत्तकारः भवति चेत् मोक्षः, सर्वशुभः।। विमानगोपुरः चतुरस्त्रः भवति चेत् काम्याः सिद्ध्यति ।। आलये गर्भगृहस्य एकद्वारः स्थापनीयः।। अन्यत् द्वारं वा गवाक्षं वा स्थापयति चेत् वंश नाशः भवति।। धन, धान्य, सुख, सन्तोष, भोग,भाग्य, सम्पदाः निर्मूलः भवति।। व्याधिग्रस्थाः भवन्ति।।

**आयणानि - फलानि :-**

१) ध्वज २) धूम ३) सिंह ४) श्वान ५) वृष ६) गार्थभ ७) गज ८) काक एतासु अष्टसु आयनेषु ध्वज, सिंह, गज, वृष आयणानि श्रेष्ठः। धूम, ध्वांक्ष, खर, श्वास आयणानि दृष्टः।।

**दिक् परीक्षा :-**

प्रप्रथमतया शास्त्रोक्त विधानेन दिक् परीक्षां कृत्वा, प्राक्दिशः निश्चयः करणीयः।। तदनन्तरं दक्षिण, पश्चिम, उत्तर दिशिषु आग्नेय, नैऋति, वायव्य, ईशान्य कोणेषु वा निर्धारणं कृत्वा द्वारस्थान निर्णयः आचरणीयः।।

**शिलाग्रहण दोषणम् :-**

विष्ण्वालयस्य अन्येषां विष्ण्वालयस्य षाषाणः, शिलाः, दारुः इत्यादि न उपयुज्यन्ते।। यदि उपयोगः करोति चेत् यजमानः, यजमानस्य वंशः नरकलोके बहुकष्टाः अनुभूय पुनः भूलोके शुनकरूपेण जननं प्राप्नोति।। मठाः कूपः, तटाकः एतेषां शिलाः पाषाणः, दारुः देवालयस्य निर्माणे न उपयोक्तव्यं।। यदि उपयोगः करोति चेत् बहुकष्टाः अनुभूय आलयनिर्मातः पुनः भूलोके दरिद्ररूपेण जननं प्राप्नोति।। अहं निर्माणं करोति विष्ण्वालयः एव इति चिन्तयित्वा अन्यत् विष्णवालयस्य शिलाः उपयुज्यन्ते चेत् बहुवारं कष्टं अनुभूय नरकलोकं प्राप्नोति।।

**अंगुलमानः - भेदाः :-**

अंगुलः पञ्चविधाः भवन्ति।। १) मानांगुलः २) मानांतरांगुलः ३) मात्रांगुलः ४) मुष्टि अंगुलः ५) देहलब्दांगुलः।।

८ परमाणवः - १ केशः

८ केशाः  - १ लीक्षः

८ लीक्षाः - १यूकः

८ यूकाः - १ यवः

८ यवाः - १ अंगुलः

८ यवाः प्रमाणं भवति - उत्तम मानांगुलः

७ यवाः प्रमाणं भवति - मध्यम मानांगुलः

६ यवाः प्रमाणं भवति - अधम मानांगुलः

**देवालयनिर्माण फलम् :-**

--------------

कर्ता "अहं देवालयनिर्माणं करिष्ये" इति संकल्पः भवति चेत् तस्य शतसंवत्सर पूर्वतः यद्कृतं पापं तत्सर्वं नश्यति।। देवमन्दिरम् आरम्भः कृतः कर्ता तत् समापन पूर्वमेव मरणं प्राप्नोति चेदपि तेषां कृते देवालयसम्पूर्ण निर्माणफलं प्राप्नोति।। कति पाषाणः उपयुज्य कर्ता आलय निर्माणं करोति तावत् संवत्सराणि देवलोके पूज्यः भवति।।

**देवालयप्रतिष्ठास्थान फलम् :-**

------------------

a) पर्वतशिखरेषु प्रतिष्ठापनं करोति चेत् - उत्तमफलम्।। b) अरण्येषु प्रतिष्ठां करोति चेत् - मध्यमफलम्।। c) नद्यां तीरे प्रतिष्ठां करोति चेत् - अथमफलम्।। d) ग्रमेषु, पट्टणेषु प्रतिष्ठां करोति चेत् - अथमाऽथम फलम्।।

**आलयद्वार दिशाः - फलानि :-**

-------------------

१) प्राक् दिशायां मुखद्वारः निर्माणः परोति चेत् - यजमानस्य, ग्रामस्य, देशस्य सुखः।। २) पश्चिमदिशायां मुखद्वारः निर्माणं करोति चेत् - लोकस्य सर्वविध पुष्टिः भवति।। ३) उत्तरदिशायां मुखद्वारः निर्माणं करोति चेत् - धनवृद्धिः।। ४) दक्षिणदिशायां मुखद्वारः निर्माणं करोति चेत् - मोक्षप्राप्तिः भवति।।

**विग्रहभेदाः :-**

-------

विग्रहः त्रिविधाः भवन्ति।। १) चित्रः २) अर्थचित्रः ३) चित्राऽभासः।।

**१)चित्रः :-**

------

विग्रहस्य पुरतः, पृष्टतः, सर्वत्र अवयवः सुन्दररूपेण निर्माणं कुर्वन्ति चेत् तद् पूर्णचित्रः इति कथ्यते।।

**२) अर्थचित्रः :-**

---------

विग्रहस्य पुरतः एव सर्वावयवः सौन्दर्यरूपेण निर्माणं कृत्वा, पृष्ठभागे किमपि अवयवः नास्ति चेत् तद् अर्थचित्रः भवति।।

**३) चित्राऽभासः :-**

----------

भित्तिः उपरि श्वेत, कृष्ण इत्यादि वर्णेन (अथवाः शिलायाः उपरि स्पष्टतया, अस्पष्टतया दृश्यते चेत् तद् चित्राऽभासः इति कथ्यते।।

**आलयनिर्माणभेदाः - तत्फलम् :-**

--------------------

a) भगवदालयः शिलायां निर्माणं करोति चेत् - श्रेष्ट फलम्।।
b) भगवदालयः अष्टकां निर्माणं करोति चेत् - मध्यम फलम्।।
c) भगवदालयः (मृत्तिकां स्वी) दारुं स्वीकृत्य निर्माणं करोति चेत् - अथम फलम् ।।

d) भगवदालयः मृत्तिकां स्वीकृत्य निर्माणं करोति चेत् - अथमाऽथम फलम्।।

**शिला शंकुः - शंकुलक्षणम् :-**

------------------

देवालयस्य मानांगुलप्रमाणेन शिलाशंकुः, गृहस्य मात्रांगुलप्रमाणेन दारुशंकुः शलक्षणरूपेण निर्माणं कृत्वा प्रतिष्ठा करणीयः ।। भगवदालयस्य स्थापनशंकुः त्रीणि भागानि कृत्वा अथोभागे चतुरस्राकारे, मध्ये अष्टकोणाकारे, उपरि कमलाकृतिः इव निर्माणः करणीयः।। तत् शंकुः गर्भमन्दिरस्य मध्यभागे "ॐ नमो नारायणाय" इति मूल मन्त्रेण स्थापनं करणीयः अष्ट दिग्भागेषु अष्ट शंकवः स्थापनीयः।।

**देवप्रतिष्ठा - शुभकालः :-**

----------------

सर्वदेवता प्रतिष्ठः उत्तरायणे आचरणीयः "शुक्लपक्षे - प्रतिपत्, द्वितीया, तृतीया, पञ्चमी, षष्ठी, सप्तमी, दशमी, एकादशी, द्वादशी, पूर्णिमा तिथयः ; कृष्णपक्षे - पञ्चमी, षष्ठी, सप्तमी,

दशमी, एकादशी, द्वादशी, पूर्णिमा तिथयः श्रेष्ठः ।। अश्विनि, रोहिणी, पुनर्वसू, पुष्यमी, उत्तरफल्गुमी, उत्तराषाढा, उत्तराभाद्रा, हस्ता, श्रवण नक्षत्राणि देवप्रतिष्ठस्य शुभः।। नवग्रहेषु चन्द्र, बुध, गुरु, शुक्र, शुभः।। वृषभ, मिधुन, सिंह, कन्या, तुल, धनुः, कुम्भ राशयः शुभाः"।।

**सर्वशुभाणाम् त्याज्यकालः :-**

---------------

संवत्सरस्य अत्निम पञ्चदशदिनानि, मासस्य अन्तिम त्रीणि दिनानि, नक्षत्रस्य अन्तिम द्विघडियाः, ग्रहणस्य पूर्वं परं सप्तदीनानि त्याज्यः।।

**अशुभ कालः :-**

-------

श्रीमन्नारायणः क्षीरसमुद्रे शयनसमयः आषाढ शुक्लपक्ष एकादशी तिथिः आरभ्य कार्तीकमास शुक्लपक्ष
एकादशी पर्यन्तं शुभकार्याणि न आचरणीयः।।

-------------

## मनुस्मृतिः

### अध्यायः - २ (ब्रह्मचर्याश्रमधर्माः)

द्विजानां तत्र तत्राधिकारश्रुतेर्द्विजत्वनिरूपणार्थमाह-

मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने ।
तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनात् ।। १६९ ।।

मातुरग्र इति।। मातुः सकाशादादौ पुरुषस्य जन्म। द्वितीयं मौञ्जिबन्धने उपनयने। 'ङ्यापोः संज्ञाछन्दसोर्बहुलम्' (पा. ६/३/६३) इति ह्रस्वः, तृतीयं ज्योतिष्टोमादियज्ञदीक्षायां वेदश्रवणात्। तथा च श्रुतिः 'पुनर्वा यदृत्विजो यज्ञियं कुर्वन्ति यद्दीक्षयन्ति' इति। प्रथमद्वितीयतृतीयजन्मकथनं चेदं द्वितीयजन्मस्तुत्यर्थं, द्विजस्यैव यज्ञदीक्षायामप्यधिकारात्।।१६९।।

तत्र यद्ब्रह्मजन्मास्य मौञ्जीबन्धनचिह्नितम् ।
तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ।। १७० ।।

तत्रेति।। तेषु त्रिषु जन्मसु मध्ये यदेतद्ब्रह्मग्रहणार्थं जन्मोपनयनसंस्काररूपं मेखलाबन्धनोपलक्षितं तत्रास्य माणवकस्य सावित्री माता, आचार्यश्च पिता, मातृपितृसंपाद्यत्वाज्जन्मनः ।। १७० ।।

वेदप्रदानादाचार्यं पितरं परिचक्षते ।
न ह्यस्मिन्युज्यते कर्म किंचिदामौञ्जिबन्धनात् ।। १७१ ।।

वेदप्रदानादिति।। वेदाध्यापनादाचार्यं पितरं मन्वादयो वदन्ति। पितृवन्महोपकारफलाद्गौणं पितृत्वम्। महोपकारमेव दर्शयति- न ह्यस्मिन्निति। यस्मादस्मिन्माणवके प्रागुपनयनात्किंचित्कर्म श्रौतं स्मार्तं च न संबध्यते, न तत्राधिक्रियत इत्यर्थः।। १७१ ।।

नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते ।
शूद्रेण हि समस्तावद्यावद्वेदे न जायते ।। १७२ ।।

नाभिव्याहारयेदिति।। आमौञ्जिबन्धनादित्यनुवर्तते। प्रागुपनयनाद्वेदं नोच्चारयेत्। 'स्वधा' शब्देन श्राद्धमुच्यते। निनीयते निष्पाद्यते येन मन्त्रजातेन तद्वर्जयित्वा मृतपितृको नवश्राद्धादौ मन्त्रं नोच्चारयेत्। तद्व्यतिरिक्तं वेदं नोदाहरेत्। यस्माद्यावद्वेदे न जायते तावदसौ शूद्रेण तुल्यः ।। १७२ ।।

कृतोपनयनस्यास्य व्रतादेशनमिष्यते ।
ब्रह्मणो ग्रहणं चैव क्रमेण विधिपूर्वकम् ।। १७३ ।।

कृतोपनयनस्येति।। यस्मादस्य माणवकस्य 'समिधमाधेहि' (गृ. सू. १/२२/६) 'दिवा मा स्वाप्सीः' (गृ. सू. १/२२/२) इत्यादिव्रतादेशनं वेदस्याध्ययनं मन्त्रब्राह्मणक्रमेण 'अध्येष्यमाणस्त्वाचान्तः' (२/७०) इत्यादिविधिपूर्वकमुपनीतस्योपदिश्यते, तस्मादुपनयनात्पूर्वं न वेदमुदाहरेत् ।। १७३ ।।

यद्यस्य विहितं चर्म यत्सूत्रं या च मेखला ।
यो दण्डो यच्च वसनं तत्तदस्य व्रतेष्वपि ।। १७४ ।।

यद्यस्येति।। यस्य ब्रह्मचारिणो यानि चर्मसूत्रमेखलादण्डवस्त्राण्युपनयनकाले गृह्येण विहितानि, गोदानादिव्रतेष्वपि तान्येव नवानि कर्तव्यानि ।। १७४ ।।

सेवेतेमांस्तु नियमान्ब्रह्मचारी गुरौ वसन् ।
सन्नियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मनः ।। १७५ ।।

सेवेतेति।। ब्रह्मचारी गुरुसमीपे वसन्निन्द्रियसंयमं कृत्वानुगतादृष्टवृद्ध्यर्थमिमान्नियमाननुतिष्ठेत् ।। १७५ ।।

नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम् ।
देवताभ्यर्चनं चैव समिदाधानमेव च ।। १७६ ।।

नित्यमिति।। प्रत्यहं स्नात्वा देवर्षिपितृभ्य उदकदानं, प्रतिमादिषु हरिहरादिदेवपूजनं, सायंप्रातश्च समिद्धोमं कुर्यात्। यस्तु गौतमीये स्नाननिषेधो ब्रह्मचारिणः स सुखस्नानविषयः। अत एव बौधायनः (२/३८)- 'नाप्सुश्लाघमानः स्नायात्'। विष्णुनात्र- 'कालद्वयमभिषेकाग्निकार्यकरणमप्सुदण्डवन्मज्जनम्' इति ब्रुवाणेन वारद्वयं स्नानमुपदिष्टम् ।। १७६ ।।

वर्जयेन्मधु मांसं च गन्धं माल्यं रसान्स्त्रियः ।
शुक्तानि यानि सर्वाणि प्राणिनां चैव हिंसनम् ।। १७७ ।।

वर्जयेदिति।। क्षौद्रं मांसं च न खादेत्। गन्धं च कर्पूरचन्दनकस्तूरिकादि वर्जयेत्। एषां च

गन्धानां यथासंभवं भक्षणमनुलेपनं च निषिद्धम्। माल्यं च न धारयेत्। उद्रिक्तरसांश्च गुडादीन्न खादेत्। स्त्रियश्च नोपेयात्। यानि स्वभावतो मधुरादिरसानि कालवशेनोदकवासादिना चाम्लयन्ति तानि शुक्तानि न खादेत्। प्राणिनां हिंसां न कुर्यात्।

अभ्यङ्गमञ्जनं च चाक्ष्णोरुपानच्छत्रधारणम् ।
कामं क्रोधं च लोभं च नर्तनं गीतवादनम् ।। १७८ ।।

अभ्यङ्गमिति।। तैलादिना शिरःसहितदेहमर्दनलक्षणं, कज्जलादिभिश्च चक्षुषोरञ्जनं, पादुकायाश्छत्रस्य च धारणं, कामं मैथुनातिरिक्तविषयाभिलाषातिशयम्। मैथुनस्य स्त्रिय इत्यनेनैव निषिद्धत्वात्। क्रोधलोभनृत्यगीतवीणापणवादि वर्जयेत् ।। १७८ ।।

द्यूतं च जनवादं च परिवादं तथानृतम् ।
स्त्रीणां च १प्रेक्षणालम्भमुपघातं परस्य च ।। १७९ ।।

द्यूतं चेति।। अक्षक्रीडां, जनैः सह निरर्थकवाक्कलहं, परस्य दोषवादं, मृषाभिधानं, *1aस्त्रीणां च मैथुनेच्छया सानुरागेण प्रेक्षणालिङ्गनं, परस्य चापकारं वर्जयेत् ।। १७९ ।।

एकः शयीत सर्वत्र न रेतः स्कन्दयेत्क्वचित् ।
कामाद्धि स्कन्दयन्रेतो हिनस्ति व्रतमात्मनः ।। १८० ।।

एक इति।। सर्वत्र नीचशय्यादावेकाकी शयनं कुर्यात्। इच्छया न स्वशुक्रं पातयेत्। यस्मादिच्छया स्वमेहनाच्छुक्रं पातयन्स्वकीयव्रतं नाशयति। व्रतलोपे चावकीर्णिप्रायश्चित्तं कुर्यात् ।। १८० ।।

स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः ।
स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत् ।। १८१ ।।

स्वप्न इति।। ब्रह्मचारी स्वप्नादावनिच्छया रेतः सिक्त्वा कृतस्नानश्चन्दनाद्यनुलेपनपुष्पधूपादिभिः सूर्यमभ्यर्च्य 'पुनर्मामैत्विन्द्रियम्' (आश्व. गृ. ३/६) इत्येतामृचं वारत्रयं पठेत्। इदमत्र प्रायश्चित्तम्।। १८१।।

उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान् ।
आहरेद्यावदर्थानि भैक्षं चाहरहश्चरेत् ।। १८२ ।।

उदकुम्भमिति।। जलकलशपुष्पगोमयमृत्तिकाकुशान् यावदर्थानि यावद्भिः प्रयोजनानि आचार्यस्य तावन्त्याचार्यार्थमाहरेत्। अत एवोदकुम्भमित्यत्रैकत्वमप्यविवक्षितम्। प्रदर्शनं चैतत्। अन्यदप्याचार्योपयुक्तमुपाहरेद्भैक्षं च प्रत्यहमर्जयेत् ।। १८२ ।।

वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु ।
ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम् ।। १८३ ।।

वेदयज्ञैरिति।। वेदयज्ञैश्चात्यक्तानां स्वकर्मसु दक्षाणां गृहेभ्यः प्रत्यहं ब्रह्मचारी सिद्धान्नभिक्षासमूहमाहरेत् ।। १८३ ।।

गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।
अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत् ।। १८४ ।।

गुरोः कुल इति।। आचार्यस्य सपिण्डेषु, बन्धुषु, मातुलादिषु च न भिक्षेत।

तद्गृहव्यतिरिक्तभिक्षायोग्यगृहाभावे चोक्तेभ्यः पूर्वं पूर्वं वर्जयेत्। ततश्च प्रथमं बन्धून्भिक्षेत, तत्रालाभे ज्ञातीन्, तत्रालाभे गुरोरपि ज्ञातीन्भिक्षेत ।। १८४ ।।

सर्वं वापि चरेद्ग्रामं पूर्वोक्तानामसंभवे ।
नियम्य प्रयतो वाचमभिशस्तांस्तु वर्जयेत् ।। १८५ ।।

सर्वं वेति।। पूर्वं 'वेदयज्ञैरहीनानाम्' (२/१८३) इत्यनेनोक्तानामसंभवे सर्वं वा ग्राममुक्तगुणरहितमपि शुचिर्मौनी भिक्षेत। महापातकाद्यभिशस्तांस्त्यजेत् ।। १८५ ।।

दूरादाहृत्य समिधः संनिदध्याद्विहायसि ।
सायंप्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः ।। १८६ ।।

दूरादिति।। दूराद्दिग्भ्यः परिगृहीतवृक्षेभ्यः समिध आनीय आकाशे धारणाशक्तः पटलादौ स्थापयेत्। ताभिश्च समिद्भिः सायंप्रातरनले होमं कुर्यात् ।। १८६ ।।

अकृत्वा भैक्षचरणमसमिध्य च पावकम् ।
अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् ।। १८७ ।।

अकृत्वेति।। भिक्षाहारं, सायंप्रातः समिद्धोमं, अरोगो नैरन्तर्येण सप्तरात्रमकृत्वा लुप्तव्रतो भवति। ततश्चावकीर्णिप्रायश्चित्तं कुर्यात् ।। १८७ ।।

भैक्षेण वर्तयेन्नित्यं नैकान्नादी भवेद्व्रती ।
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ।। १८८ ।।

भैक्षेणेति।। ब्रह्मचारी न एकान्नमद्यात्किंतु बहुगृहाहृतभिक्षासमूहेग प्रत्यहं जीवेत्। यस्माद्भिक्षासमूहेन ब्रह्मचारिणो वृत्तिरुपवासतुल्या मुनिभिः स्मृता ।। १८८ ।।

व्रतवद्देवदैवत्ये पित्र्ये कर्मण्यथर्षिवत् ।
काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते ।। १८९ ।।

व्रतवदिति।। पूर्वनिषिद्धस्यैकान्नभोजनस्यायं प्रतिप्रसवः। देवदैवत्ये कर्मणि देवतोद्देशेनाभ्यर्थितो ब्रह्मचारी व्रतवदिति व्रतविरुद्धमधुमांसादिवर्जितमेकस्याप्यन्नं यथेप्सितं भुञ्जीत। अथ पित्रुद्देशेनाभ्यर्थितो भवति तदा ऋषिर्यतिः सम्यग्दर्शनसंपन्नत्वात्स इव मधुमांसवर्जितमेकस्याप्यन्नं यथेप्सितं भुञ्जीत इति स एवार्थो वैदग्ध्येनोक्तः, तथापि भैक्षवृत्तिनियमरूपं व्रतमस्य लुप्तं न भवति। याज्ञवल्क्योऽपि श्राद्धेऽभ्यर्थितस्यैकान्नभोजनमाह- 'ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि। ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन् ।।' (याज्ञ. स्मृ. १/३२)- इति। विश्वरूपेण तु 'व्रतमस्य न लुप्यते' इति पश्यता ब्रह्मचारिणो मांसभक्षणमनेन मनुवचनेन विधीयत इति व्याख्यातम् ।। १८९ ।।

ब्राह्मणस्यैव कर्मैतदुपदिष्टं मनीषिभिः ।
राजन्यवैश्ययोस्त्वेवं नैतत्कर्म विधीयते ।। १९० ।।

ब्राह्मणस्यैवेति।। ब्राह्मणक्षत्रियविशां त्रयाणामेव ब्रह्मचारिणां भैक्षाचरणविधानात् 'व्रतवत्' (२/१८९) इत्यनेन तदपवादरूपमेकान्नभोजनमुपदिष्टं क्षत्रियवैश्ययोरपि पुनरुक्तेन पर्युदस्यते। एतदेकान्नभोजनरूपं कर्म तद्ब्राह्मणस्यैव वेदार्थविद्भिर्विहितम्। क्षत्रियवैश्ययोः पुनर्न चैतत्कर्मेति ब्रूते ।। १९० ।।

चोदितो गुरुणा नित्यमप्रचोदित एव वा ।
कुर्यादध्ययने २यत्नमाचार्यस्य हितेषु च ।। १९१ ।।

चोदित इति।। आचार्येण प्रेरितो न प्रेरितो वा स्वयमेव प्रत्यहमध्ययने गुरुहितेषु चोद्योगं कुर्यात् ।। १९१ ।।

शरीरं चैव वाचं च बुद्धीन्द्रियमनांसि च ।
नियम्य प्राञ्जलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखम् ।। १९२ ।।

शरीरं चेति।। देहवाग्बुद्धीन्द्रियमनांसि नियम्य कृताञ्जलिर्गुरुमुखं पश्यंस्तिष्ठेन्नोपविशेत् ।। १९२ ।।

नित्यमुद्धृतपाणिः स्यात्साध्वाचारः सुसंयतः ।
आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः ।। १९३ ।।

नित्यमिति।। सततमुत्तरीयाद्बहिष्कृतदक्षिणबाहुः, शोभनाचारः, वस्त्रावृतदेहः, 'आस्यताम्' इति गुरुणोक्तः सन् गुरोरभिमुखं यथा भवति तथा आसीत ।। १९३ ।।

हीनान्नवस्त्रवेषः स्यात्सर्वदा गुरुसन्निधौ ।
उत्तिष्ठेत्प्रथमं चास्य चरमं चैव संविशेत् ।। १९४ ।।

हीनान्नवस्त्रेति।। सर्वदा गुरुसमीपे गुर्वपेक्षया त्ववकृष्टान्नवस्त्रप्रसाधनो भवेत्। गुरोश्च प्रथमं रात्रिशेषे शयनादुत्तिष्ठेत्, प्रदोषे च गुरौ सुप्ते पश्चाच्छयीत ।। १९४ ।।

प्रतिश्रवणसंभाषे शयानो न समाचरेत् ।
नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः ।। १९५ ।।

प्रतिश्रवणेति।। प्रतिश्रवणमाज्ञाङ्गीकरणं, संभाषणं च गुरोः शय्यायां सुप्तः, आसनोपविष्टः, भुञ्जानः, तिष्ठन्, विमुखश्च न कुर्यात् ।। १९५ ।।

कथं तर्हि कुर्यात्तदाह-

आसीनस्य स्थितः कुर्यादभिगच्छंस्तु तिष्ठतः ।
प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः ।। १९६ ।।

आसीनस्येति।। आसनोपविष्टस्य गुरोराज्ञां ददतः स्वयमासनादुत्थितः, तिष्ठतो गुरोरादिशतस्तदभिमुखं कतिचित्पदानि गत्वा, यथा गुरुरागच्छति तथाप्यभिमुखं गत्वा, यदा तु गुरुर्धावन्नादिशति तदा तस्य पश्चाद्धावन्प्रतिश्रवणसंभाषे कुर्यात् ।। १९६ ।।

पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चान्तिकम् ।
प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः ।। १९७ ।।

पराङ्मुखस्येति।। पराङ्मुखस्य वादिशतः संमुखस्थः, दूरस्थस्य गुरोः समीपमागत्य, शयानस्य गुरोः प्रणम्य प्रह्वो भूत्वा, निदेशे निकटेऽवतिष्ठतो गुरोरादिशतः प्रह्वीभूयैव प्रतिश्रवणसंभाषे कुर्यात् ।। १९७ ।।

नीचं शय्यासनं चास्य ३सर्वदा गुरुसन्निधौ ।
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत् ।। १९८ ।।

नीचमिति।। गुरुसमीपे चास्य गुरुशय्यासनापेक्षया नीचे एव शय्यासने नित्यं स्याताम्। यत्र च देशे समासीनं गुरुः पश्यति न तत्र यथेष्टचेष्टां चरणप्रसारणादिकां कुर्यात् ।। १९८ ।।

नोदाहरेदस्य नाम परोक्षमपि केवलम् ।
न चैवास्यानुकुर्वीत गतिभाषितचेष्टितम् ।। १९९ ।।

नोदाहरेदिति।। अस्य गुरोः परोक्षमपि उपाध्यायाचार्यादिपूजावचनोपपदशून्यं नाम नोच्चारयेत्। नतु गुरोर्गमनभाषितचेष्टितान्यनुकुर्वीत गुरुगमनादिसदृशान्यात्मनो गमनादीन्युपहासबुद्ध्या न कुर्वीत ।। १९९ ।।

गुरोर्यत्र परीवादो निन्दा वापि प्रवर्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ।। २०० ।।

गुरोर्यत्रेति।। विद्यमानदोषस्याभिधानं परीवादः, अविद्यमानदोषाभिधानं निन्दा, यत्र देशे गुरोः परीवादो निन्दा च वर्तते तत्र स्थितेन शिष्येण कर्णौ हस्तादिना तिरोधातव्यौ। तस्माद्वा देशाद्देशान्तरं गन्तव्यम् ।। २०० ।।

इदानीं शिष्यकर्तृकपरीवादकृतफलमाह-

परीवादात्खरो भवति श्वा वै भवति निन्दकः ।
परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी ।। २०१ ।।

परीवादादिति।। गुरोः परीवादाच्छिष्यो मृतः खरो भवति। गुरोर्निन्दकः कुक्कुरो भवति। परिभोक्ता अनुचितेन गुरुधनेनोपजीवकः कृमिर्भवति। मत्सरी गुरोरुत्कर्षासहनः कीटो भवति; कीटः कृमिभ्यः किंचित्स्थूलो भवति ।। २०१ ।।

दूरस्थो नार्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः ।
यानासनस्थश्चैवैनमवरुह्याभिवादयेत् ।। २०२ ।।

दूरस्थ इति।। दूरस्थः शिष्योऽन्यं नियुज्य माल्यवस्त्रादिना गुरुं नार्चयेत्। स्वयं गमनाशक्तौ त्वदोषः। क्रुद्धः कामिनीसमीपे च स्थितं स्वयमपि नार्चयेत्। यानासनस्थश्च शिष्यो यानासनादवतीर्य गुरुमभिवादयेत्। *3a`यानासनस्थश्चैवैनं प्रत्युत्थाय' (२/१९) इत्यनेन यानासनादुत्थानं विहितम्; अनेन तु यानासनत्याग इत्यपुनरुक्तिः ।। २०२ ।।

४प्रतिवातेऽनुवाते च नासीत गुरुणा सह ।
असंश्रवे चैव गुरोर्न किंचिदपि कीर्तयेत् ।। २०३ ।।

प्रतिवात इति।। प्रतिगतोऽभिमुखीभूतः शिष्यस्तदा गुरुदेशाच्छिष्यदेशमागच्छति स प्रतिवातः, यः शिष्यदेशाद्गुरुदेशमागच्छति सोऽनुवातः, तत्र गुरुणा समं नासीत। तथाऽविद्यमानः संश्रवो यत्र तस्मिन्नसंश्रवे। गुरुर्यत्र न श्रृणोतीत्यर्थः। तत्र गुरुगतमन्यगतं वा न किंचित्कथयेत् ।। २०३ ।।

गोऽश्वोष्ट्रयानप्रासादस्र५ स्तरेषु कटेषु च ।
आसीत गुरुणा सार्धं शिलाफलकनौषु च ।। २०४ ।।

गोऽश्वेति।। 'यान' शब्दः प्रत्येकमभिसंबध्यते। बलीवर्दयाने, घोटकप्रयुक्ते याने, उष्ट्रयुक्तयाने, रथकाष्ठादौ, प्रासादोपरि, स्रस्तरे, कटे च तृणादिनिर्मिते, शिलायां, फलके च दारुघटितदीर्घासने, नौकायां च गुरुणा सह आसीत ।। २०४ ।।

गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् ।
न चानिसृष्टो गुरुणा स्वान्गुरूनभिवादयेत् ।। २०५ ।।

गुरोर्गुराविति।। आचार्यस्याचार्ये सन्निहिते आचार्य इव तस्मिन्नप्यभिवादनादिकां

वृत्तिमनुतिष्ठेत्। तथा गुरुगृहे वसन् शिष्य आचार्येणानियुक्तो न स्वान्गुरून्मातृपितृव्यादीनभिवादयेत्।। २०५ ।।

विद्यागुरुष्वे६ तदेव नित्या वृत्तिः स्वयोनिषु ।
प्रतिषेधत्सु ७चाधर्मान्हितं चोपदिशत्स्वपि ।। २०६ ।।

विद्येति।। आचार्यव्यतिरिक्ता उपाध्याया विद्यागुरवः, तेष्वेतदेवेति सामान्योपक्रमः। किं तत्? आचार्य इव नित्या सार्वकालिकी वृत्तिर्विधेया, तथा स्वयोनिष्वपि पितृव्यादिषु तद्वृत्तिः, अधर्मान्निषेधत्सु धर्मतत्त्वं चोपदिशत्सु गुरुवद्वर्तितव्यम्।। २०६ ।।

श्रेयःसु गुरुवद्वृत्तिं नित्यमेव समाचरेत् ।
८गुरुपुत्रेषु चार्येषु गुरोश्चैव स्वबन्धुषु ।। २०७ ।।

श्रेयःस्विति।। श्रेयःसु विद्यातपः समृद्धेषु, आर्येष्विति गुरुपुत्रविशेषणम्। समानजातिगुरुपुत्रेषु गुरोश्च ज्ञातिष्वपि पितृव्यादिषु सर्वदा गुरुवद्वृत्तिमनुतिष्ठेत्। गुरुपुत्रश्चात्र शिष्याधिकवयाश्च बोद्धव्यः। शिष्यबालसमानवयसामनन्तरं शिष्यस्य वक्ष्यमाणत्वात्।। २०७ ।।

बालः समानजन्मा वा शिष्यो वा यज्ञकर्मणि ।
अध्यापयन्गुरुसुतो गुरुवन्मानमर्हति ।। २०८ ।।

बाल इति।। कनिष्ठः सवया वा ज्येष्ठोऽपि वा शिष्योऽध्यापयन्नध्यापनसमर्थः। गृहीतवेद इत्यर्थः। स यज्ञकर्मणि ऋत्विगनृत्विग्वा यज्ञदर्शनार्थमागतो गुरुवत्पूजामर्हति ।। २०८ ।।

आचार्यवदित्यविशेषेण पूजायां प्राप्तायां विशेषमाह-

उत्सादनं च गात्राणां स्नापनोच्छिष्टभोजने ।
न कुर्याद्गुरुपुत्रस्य पादयोश्चावनेजनम् ।। २०९ ।।

उत्सादनमिति।। गात्राणामुत्सादनमुद्वर्तनं, उच्छिष्टस्य भक्षणं, पादयोश्च प्रक्षालनं गुरुपुत्रस्य न कुर्यात् ।। २०९ ।।

गुरुवत्प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः ।
असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः ।। २१० ।।

गुरुवदिति।। सवर्णा गुरुपत्न्यः गुरुवदाज्ञाकरणादिना पूज्या भवेयुः। असवर्णाः पुनः केवलप्रत्युत्थानाभिवादनैः ।। २१० ।।

अभ्यञ्जनं स्नापनं च गात्रोत्सादनमेव च ।
गुरुपत्न्या न कार्याणि केशानां च प्रसाधनम् ।। २११ ।।

अभ्यञ्जनमिति।। तैलादिना देहाभ्यङ्गः, स्नापनं, गात्राणां चोद्वर्तनं, केशानां च मालादिना प्रसाधनम्; एतानि गुरुपत्न्या न कर्तव्यानि। केशानामिति प्रदर्शनमात्रार्थं, देहस्यापि चन्दनादिना प्रसाधनं न कुर्यात् ।। २११ ।।

गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः ।
पूर्णविंशतिवर्षेण गुणदोषौ विजानता ।। २१२ ।।

गुरुपत्नी त्विति।। युवतिर्गुरुपत्नी पादयोरुपसंगृह्य अभिवादनदोषगुणज्ञेन यूना नाभिवाद्या। पूर्ण- विंशतिवर्षत्वं यौवनप्रदर्शनार्थम्। बालस्य पादयोरभिवादनमनिषिद्धम्। यूनस्तु भूमावभिवादनं वक्ष्यति।।२१२।।

स्वभाव एष नारीणां नराणामिह दूषणम् ।
अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः ।। २१३ ।।

स्वभाव इति।। स्त्रीणामयं स्वभावः यदिह श्रृङ्गारचेष्टया व्यामोह्य पुरुषाणां दूषणम्। अतोऽर्थादस्माद्धेतोः पण्डिताः स्त्रीषु न प्रमत्ता भवन्ति ।। २१३ ।।

अविद्वांसमलं लोके विद्वांसमपि वा पुनः ।
प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम् ।। २१४ ।।

अविद्वांसमिति।। 'विद्वानहं जितेन्द्रिय' इति बुद्ध्या न स्त्रीसन्निधिर्विधेयः। यस्मादविद्वांसं विद्वांसमपि वा पुनः पुरुषं देहधर्मात्कामक्रोधवशानुयायिनं स्त्रिय उत्पथं नेतुं समर्थाः ।। २१४ ।।

अत आह-

मात्रा स्वस्रा दुहित्रा वा ९न विविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ।। २१५ ।।

मात्रेति।। मात्रा, भगिन्या, दुहित्रा, निर्जनगृहादौ नासीत। यतोऽतिबल इन्द्रियगणः शास्त्रनियमितात्मानमपि पुरुषं परवशं करोति ।। २१५ ।।

कामं तु गुरुपत्नीनां युवतीनां युवा भुवि ।
विधिवद्वन्दनं कुर्यादसावहमिति ब्रुवन् ।। २१६ ।।

कामं त्विति।। कामं तु गुरुपत्नीनां युवतीनां स्वयमपि युवा यथोक्तविधिना 'अभिवादयेऽमुकशर्माहं भोः' इति ब्रुवन्पादग्रहणं विना यथेष्टमभिवादनं कुर्यात् ।। २१६ ।।

विप्रोष्य पादग्रहणमन्वहं चाभिवादनम् ।
गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन् ।। २१७ ।।

विप्रोष्येति।। प्रवासादागत्य 'सव्येन सव्यं दक्षिणेन च दक्षिणम्' इत्युक्तविधिना पादग्रहणं प्रत्यहं भूमावभिवादनं च गुरुपत्नीषु युवा कुर्यात्। शिष्टानामयमाचार इति जानन्तु ।। २१७ ।।

उक्तस्य शुश्रूषाविधेः फलमाह-

यथा खनन्खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ।। २१८ ।।

यथेति।। यथा कश्चिन्मनुष्यः खनित्रेण भूमिं खनन् जलं प्राप्नोति, एवं गुरौ स्थितां विद्यां गुरुसेवापरः शिष्यः प्राप्नोति ।। २१८ ।।

ब्रह्मचारिणः प्रकारत्रयमाह-

मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटः ।
नैनं ग्रामेऽभिनिम्लोचेत् सूर्यो नाभ्युदियात्क्वचित् ।। २१९ ।।

मुण्डो वेति।। मुण्डितमस्तकः, शिरःकेशोजटावान्वा, शिखैव वा जटा जाता यस्य, एनं

ब्रह्मचारिणं क्वचिद्ग्रामे निद्राणं, उत्तरत्र 'शयानम्' इति दर्शनात्सूर्यो नाभिनिम्लोचेन्नास्तमियात् ।। २१९ ।।

अत्र प्रायश्चित्तमाह-

तं चेदभ्युदियात्सूर्यः शयानं कामचारतः ।
निम्लोचेद्वाऽप्यविज्ञानाज्जपन्नुपवसेद्दिनम् ।। २२० ।।

तं चेदिति।। तं चेत्कामतो निद्राणं निद्रोपवशत्वेन सूर्योऽभ्युदियादस्तमियात्तदा सावित्रीं जपन्नुभयत्रापि दिनमुपवसन् रात्रौ भुञ्जीत। अभिनिम्लुक्तस्योत्तरेऽहनि उपवासजपौ। 'अभिरभागे' (पा. १/४/९१) इति कर्मप्रवचनीयसंज्ञा, ततः कर्मप्रवचनीययुक्ते द्वितीया। सावित्रीजपं तु गौतमवचनात्। तदाह गौतमः (२४/२)- '१०सूर्याभ्युदितो ब्रह्मचारी तिष्ठेदहरभुञ्जानोऽभ्य११ स्तमितश्च रात्रिं जपन्सावित्रीम्'। ननु गौतमवचनात्सूर्याभ्युदितस्यैव दिनाभोजनजपावुक्तौ, अभ्यस्तमितस्य तु रात्र्यभोजनजपौ। नैतत्; अपेक्षायां व्याख्यासंदेहे वा मुन्यन्तरविवृतमर्थमन्वयं वाश्रयामहे नतु स्फुटं मन्वर्थं स्मृत्यन्तरदर्शनादन्यथा कुर्मः। अत एव जपापेक्षायां गौतमवचनात्सावित्रीजपोऽभ्युपेय एव, नतूभयत्र स्फुटं मनूक्तं दिनोपवासजपावपाकुर्मः। तस्मादभ्यस्तमितस्यमानवगौतमीयप्रायश्चित्तविकल्पः।। २२० ।।

अस्य तु प्रायश्चित्तविधेरर्थवादमाह-

सूर्येण १२ह्यभिनिर्मुक्तः शयानोऽभ्युदितश्च यः ।
प्रायश्चित्तमकुर्वाणो युक्तः स्यान्महतैनसा ।। २२१ ।।

सूर्येणेति।। यस्मात्सूर्येणाभिनिर्मुक्तोऽभ्युदितश्च निद्राणः प्रायश्चित्तमकुर्वन् महता पापेन युक्तो नरकं गच्छति। तस्माद्यथोक्तप्रायश्चित्तं कुर्यात् ।। २२१ ।।

यस्मादुक्तप्रकारेण संध्यातिक्रमे महत्पापम्, अतः-

आचम्य प्रयतो नित्यमुभे संध्ये समाहितः ।
शुचौ देशे जपञ्जप्यमुपासीत यथाविधि ।। २२२ ।।

आचम्येति।। आचम्य पवित्रो नित्यमनन्यमनाः शुचिदेशे सावित्रीं जपन्नुभे संध्ये विधिवदुपासीत ।।२२२ ।।

यदि स्त्री यद्यवरजः श्रेयः किंचित्समाचरेत् ।
तत्सर्वमाचरेद्युक्तो यत्र १३चास्य रमेन्मनः ।। २२३ ।।

यदीति।। यदि स्त्री शूद्रो वा किंचिच्छ्रेयोऽनुतिष्ठति तत्सर्वं युक्तोऽनुतिष्ठेत्। यत्र च शास्त्रानिषिद्धे मनोऽस्य तुष्यति तदपि कुर्यात् ।। २२३ ।।

श्रेय एव हि धर्मार्थौ तद्दर्शयति -

धर्मार्थावुच्यते श्रेयः कामार्थौ धर्म एव च ।
अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः ।। २२४ ।।

धर्मार्थाविति।। धर्मार्थौ श्रेयोऽभिधीयते, कामहेतुत्वादिति केचिदाचार्या मन्यन्ते। अन्ये त्वर्थकामौ सुखहेतुत्वाच्छ्रेयोऽभिधीयते। धर्म एवेत्यपरे। अर्थकामयोरभ्युपायत्वात्। अर्थ एवेह लोके श्रेय इत्यन्ये। धर्मकामयोरपि साधनत्वात्। संप्रति स्वमतमाह- धर्मार्थकामात्मकः परस्पराविरुद्धस्त्रिवर्ग एव पुरुषार्थतया श्रेय इति १४विनिश्चयः। एवं च बुभुक्षून्प्रत्युपदेशो न

मुमुक्षून्। मुमुक्षूणां तु मोक्ष एव श्रेय इति षष्ठे वक्ष्यते ।। २२४ ।।

आचार्यश्च पिता चैव माता भ्राता च पूर्वजः ।
नार्तेनाप्यवमन्तव्या ब्राह्मणेन विशेषतः ।। २२५ ।।

आचार्यश्चेति।। आचार्यो जनको जननी च भ्राता च सगर्भो ज्येष्ठः पीडितेनाप्यमी नावमाननीयाः, विशेषतो ब्राह्मणेन ।। २२५ ।।

यस्मात्,-

आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ।
माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः ।। २२६ ।।

आचार्य इति।। आचार्यो वेदान्तोदितस्य ब्रह्मणः परमात्मनो मूर्तिः शरीरं, पिता हिरण्यगर्भस्य, माता च धारणात्पृथिवीमूर्तिः, भ्राता च स्वः सगर्भः क्षेत्रज्ञस्य। तस्माद्देवतारूपा एता नावमन्तव्याः ।। २२६ ।।

यं मातापितरौ क्लेशं सहेते संभवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ।। २२७ ।।

यमिति।। नृणामपत्यानां संभवे गर्भाधाने सति अनन्तरं यं क्लेशं मातापितरौ सहेते तस्य वर्षशतैरप्यनेकैरपि जन्मभिरानृण्यं कर्तुमशक्यम्। मातुस्तावत्कुक्षौ धारणदुःखं, प्रसववेदनातिशयः, जातस्य रक्षणवर्धनकष्टं च पितुरधिकान्येव। रक्षासंवर्धनदुःखं, उपनयनात्प्रभृति वेदतदङ्गाध्यापनादिक्लेशातिशय इति सर्वसिद्धम् ।। २२७ ।।

तस्मात्, -

तयोर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा ।
तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते ।। २२८ ।।

तयोर्नित्यमिति।। तयोर्मातापित्रोः प्रत्यहमाचार्यस्य च सर्वदा प्रीतिमुत्पादयेत्। यस्मात्तेष्वेव त्रिषु प्रीतेषु सर्वं तपश्चान्द्रायणादिकं फलद्वारेण सम्यक्प्राप्यते मात्रादित्रयतुष्ट्यैव सर्वस्य तपसः फलं प्राप्यत इत्यादि ।। २२८ ।।

तेषां त्रयाणां शुश्रूषा परमं तप उच्यते ।
न १५तैरभ्यननुज्ञातो धर्ममन्यं समाचरेत् ।। २२९ ।।

तेषामिति।। तेषां मातापित्राचार्याणां परिचर्या सर्वं तपोमयं श्रेष्ठमित एव सर्वतपःफलप्राप्तेः। यद्यन्यमपि धर्मं कथंचित्करोति तदप्येतन्त्रयानुमतिव्यतिरेकेण न कुर्यात् ।। २२९ ।।

त एव हि त्रयो लोकास्त एव त्रय आश्रमाः ।
त एव हि त्रयो वेदास्त एवोक्तास्त्रयोऽग्नयः ।। २३० ।।

त एवेति।। यस्मात्त एव मातापित्राचार्यास्त्रयो लोकाः, लोकत्रयप्राप्तिहेतुत्वात्। कारणे कार्योपचारः। त एव ब्रह्मचर्यादिभावत्रयरूपा आश्रमाः। गार्हस्थ्याद्याश्रमत्रयप्रदायकत्वात्। त एव त्रयो वेदाः, वेदत्रयजपफलोपायत्वात्। त एव हि त्रयोऽग्नयोऽभिहितास्त्रेतासंपाद्ययज्ञादिफलदातृत्वात्।। २३० ।।

पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः ।
गुरुराहवनीयस्तु साग्नित्रेता गरीयसी ।। २३१ ।।

पितेति।। वैशब्दोऽवधारणे। पितैव गार्हपत्योऽग्निः, माता दक्षिणाग्निः, आचार्य आहवनीयः। सेयमग्नित्रेता श्रेष्ठतरा। स्तुत्यर्थत्वाच्चास्य न वस्तुविरोधोऽत्र भावनीयः ।। २३१ ।।

त्रिष्वप्रमाद्यन्नेतेषु त्रींल्लोकान्विजयेद्गृही ।
दीप्यमानः स्ववपुषा देववद्दिवि मोदते ।। २३२ ।।

त्रिष्विति।। एतेषु त्रिषु प्रमादमकुर्वन्ब्रह्मचारी तावज्जयत्येव, गृहस्थोऽपि त्रींल्लोकान्विजयते। संज्ञापूर्वकस्यात्मनेपदविधेरनित्यत्वान्न 'विपराभ्यां जेः' (पा. १/३/१९) इत्यात्मनेपदम्। त्रींल्लोकान्विजयेदिति त्रिषाधिपत्यं प्राप्नोति; तथा स्ववपुषा प्रकाशमानः सूर्यादिदेववद्दिवि हृष्टो भवति ।। २३२ ।।

इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम् ।
गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते ।। २३३ ।।

इममिति।। इमं भूर्लोकं मातृभक्त्या, पितृभक्त्या मध्यममन्तरिक्षम्, आचार्यभक्त्या तु हिरण्यगर्भलोकमेव प्राप्नोति ।। २३३ ।।

सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः ।
अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ।। २३४ ।।

सर्व इति।। यस्यैते त्रयो मातृपित्राचार्या आदृताः सत्कृतास्तस्य सर्वे धर्माः फलदा भवन्ति। यस्यैते त्रयोऽनादृतास्तस्य सर्वाणि श्रौतस्मार्तकर्माणि निष्फलानि भवन्ति ।। २३४ ।।

यावन्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत् ।
तेष्वेव नित्यं शुश्रूषां कुर्यात्प्रियहिते रतः ।। २३५ ।।

यावदिति।। ते त्रयो यावज्जीवन्ति तावदन्यं धर्मं स्वातन्त्र्येण नानुतिष्ठेत्। तदनुज्ञया तु धर्मानुष्ठानं प्राग्विहितमेव। किंतु तेष्वेव प्रत्यहं प्रियहितपरः शुश्रूषां तदर्थे प्रीतिसाधनं प्रियम्, भेषजपानादिवत्। आयत्यामिष्टसाधनं हितम् ।। २३५ ।।

तेषामनुपरोधेन पारत्र्यं यद्यदाचरेत् ।
तत्तन्निवेदयेत्तेभ्यो मनोवचनकर्मभिः ।। २३६ ।।

तेषामिति।। तेषां शुश्रूषाया अविरोधेन तदनुज्ञातो यद्यन्मनोवचनकर्मभिः परलोकफलं कर्मानुष्ठितं तन्मयैतदनुष्ठितमिति पश्चात्तेभ्यो निवेदयेत् ।। २३६ ।।

त्रिष्वेतेष्वितिकृत्यं हि पुरुषस्य समाप्यते ।
एष धर्मः परः साक्षादुपधर्मोऽन्य उच्यते ।। २३७ ।।

त्रिष्विति।। इतिशब्दः कार्त्स्न्ये। हिशब्दो हेतौ। यस्मादेतेषु त्रिषु शुश्रूषितेषु पुरुषस्य सर्वं श्रौतस्मार्तं कर्तव्यं संपूर्णमनुष्ठितं भवति, तत्फलावाप्तेः। तस्मादेव श्रेष्ठो धर्मः साक्षात्सर्वपुरुषार्थसाधनः। अन्यस्त्वग्निहोत्रादिप्रतिनियतस्वर्गादिहेतुरूपधर्मो जघन्यधर्म इति शुश्रूषास्तुतिः ।। २३७ ।।

***